श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री मुक्कूर् लक्ष्मीनृसिंहस्वामिना अनुगृहीतं

# ॥ श्री मालोलपञ्चकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री मालोलपञ्चकम् ॥

योगिध्येयं सदानन्दं भक्तानामभयङ्करम्।
मालोलं पुण्डरीकाक्षं संश्रये वरदं हरिम्॥ 1 ॥

सर्गस्थितिविनाशानां कर्ता कर्तृपतिः स्वयम्।
मालोलं पुण्डरीकाक्षं संश्रये वरदं हरिम्॥ 2 ॥

रमासखं दयापूर्णं सर्वलोकनमस्कृतम्।
मालोलं पुण्डरीकाक्षं संश्रये वरदं हरिम्॥ 3 ॥

प्रह्लादवरदं श्रेष्ठं गरुडाद्रिनिवासिनम्।
मालोलं पुण्डरीकाक्षं संश्रये वरदं हरिम्॥ 4 ॥

वेदान्तगुरुणा नित्यं सेव्यमानं परं शुभम्।
मालोलं पुण्डरीकाक्षं संश्रये वरदं हरिम्॥ 5 ॥

श्रीरङ्गयोगिकृपया प्रोक्तं स्तोत्रमिदं शुभम्।
यः पठेच्छ्रद्धया नित्यं सर्वपापैः प्रमुच्यते॥ 6 ॥

॥ इति श्री मालोलपञ्चकं समाप्तम्॥